Chapter-4

# चतुर्थ-परिच्छेदः

## (विषयवैशिष्ट्यविवेचनम्)

i. पाणिनिहेमव्याकरणयोः वैशिष्ट्यम्।

ii. उभयोरन्तरम्।

iii. एकस्य अपरेण गतार्थता नवा।

(पृष्ठसंख्या-७५ तः ९६ पर्यन्तम्)

॥ ॐ ॥

# चतुर्थपरिच्छेदः

## ॥ पाणिनिहैमव्याकरणयोः वैशिष्ट्यम् ॥

स्वशब्दानुशासने महती सूक्ष्मेक्षिका वर्तत उभयाचार्ययोः। नैजवैशिष्ट्यञ्च तत्र-तत्र समाकलितम्। यद्यपि निखिलव्याकृतौ यत्र-तत्र प्रतिपादं यस्य विशदविवरण-मग्रिमे विषये विवेचितम्। अधुना वयं कानिचन विशिष्टस्थानानि चर्चयिष्यामहे।

पाणिनिनाऽष्टसु अध्यायेषु शब्दसाधुत्वबोधकानि सूत्राणि प्रणितानि। तत्र 'पूर्वत्राऽसिद्धम्' (८/२/१) तेन सपादसप्ताध्यायीं प्रति त्रिपाद्यसिद्धा, त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रमसिद्धं स्यात्। अधिकारसूत्रमिदम् – अधिकारसूत्रत्वञ्च स्वदेशे लक्ष्योपयोगिवाक्यार्थबोधजनकत्वशून्यत्वे सति विधिशास्त्रैकवाक्यतया लक्ष्योपयोगि-बोधजनकत्वम्। अत्र अधिकारश्च लक्षणश्चेति तन्त्रावृत्या साङ्कर्यं वारणीयम्। सूत्रघटक-पूर्वत्वस्य परत्वे नित्यासाकाङ्क्षतया परमिति लब्धम्। तथा चास्मात् पूर्वस्मिन् शास्त्रे कर्तव्येऽस्मात्परं शास्त्रमसिद्धमित्यर्थः। सिद्धे परशास्त्रेऽसिद्धविधानेऽसिद्धवदिति लभ्यते, 'सिंहो माणवकः' इतिवत्। अयम्भावः – 'पूर्वत्राऽसिद्धम्' इत्यतः पूर्व-सूत्रसमुदायः सपादसप्ताध्यायीपदेन व्यवह्रियते। सपादसप्ताध्यायिस्थे कर्तव्ये त्रिपाद्य-सिद्धम्। त्रिपाद्यामपि अर्थात् अवशिष्टेषु त्रिषु पादेष्वपि पूर्वशास्त्रं प्रति परशास्त्रमसिद्धम्। अत्र ध्यातव्यम् यत् असिद्धत्वञ्च शास्त्रस्यैवानेन बोध्यते न तु कार्यस्य, प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम् इति न्यायात्।

किञ्च कार्यासिद्धत्वे अमू, अमी इत्यवस्थायां कार्य्ये जाते एव तत्रासिद्धत्वारोपः कर्तुं शक्यते, कार्यरुपाधाराभावे निराधारारोपः कथं स्यादिति 'अदसोऽसेः' (८/२/८०) इति मुत्वे कृते अमु अ औ इत्यवस्थायाम् 'अतो गुणे' (६/४/९७) इति सपादसप्ताध्यायीस्थे कर्तव्ये असिद्धम् इत्यर्थकेन मुत्वस्यासिद्धत्वं वाच्यम्। तथा च मुत्वेऽसिद्धे 'अतो गुणे' इति शास्त्रम् 'अ अ औ' इत्येव पश्येत, न तु 'अद अ औ' इति, मुत्वेऽसिद्धेऽपि देवदत्ते हते तद्धन्तुश्चैत्रस्य हननेऽपि यथा नोज्जीवनं

देवदत्तस्य, तथा दस्य हन्तुर्मुत्वस्य 'पूर्वत्राऽसिद्धम्' इत्यनेन हननेऽपि हतस्य दस्योज्जीवनं न स्यादिति दकारोत्तराकारस्याभावाद् 'अतो गुणे' इति पररुपं न स्यादिति अमू, अमी इत्यादिरुपासिद्धिः स्पस्टैव। शास्त्रासिद्धत्वे तु 'अतो गुणे' इति दृष्ट्या मुत्वविधायकशास्त्रस्यैवासिद्धत्वेन मुत्वात्प्रागेव प्रथमं निष्कण्टकम् 'अतो गुणे' इति पररुपे अद औ इति जाते पुनर्वृद्धौ कर्तव्यतायामपि मुत्वशास्त्रस्य पूर्ववद्सिद्ध्या 'अदौ' इति जाते 'अदसः' मुत्वे मीत्वे च अमू, अमी, इति सिद्ध्यति।

महर्षिपाणिनिना अनेनाधिकारसूत्रेण सकलशास्त्रे प्रयोगाणां साधुत्वं समपादि। एतत्तस्याद्वितीयवैशिष्ट्यं तथा महत्याः प्रतिभायाः सूचकमुदाहरणमिदम्। आचार्यहेमचन्द्रेणाऽपि स्वशब्दानुशासने अपूर्ववैशिष्ट्यं प्रतिपादितम्। तत्र 'णषमसत् परे स्यादिविधौ च' (२/१/६०) इतः सूत्रादारभ्य यत् परं कार्यं विधास्यते तस्मिन् स्याद्यधिकारविहिते च पूर्वस्मिन्नपि कर्तव्ये णत्वं षत्वं चाडसद् असिद्धं स्यात्, एतत्सूत्रनिर्दिष्टयोश्च ण-षयोः परे षे णोऽसन्। सूत्रार्थस्तु स्पष्टमेव, उदाहरणानि– पूष्णः तक्ष्णः अत्र ङस्-ङसि-शस् वा, ततः परत्वादनोऽकारलोपं बाधित्वा णत्वं प्राप्तं, तस्यासद्वचनेन प्रवृत्यभावाद् अनन्तत्वाद् 'अनोऽस्य' (२/१/१०८) इत्यकारलोपो भवति। पाणिनीयवत् अत्राऽपि बहुनां शब्दानां साधुत्वमनुशास्ति। संस्कृताऽध्ययने धातूनां मानसपटे अवधारणं छात्राणां कृते महती समस्या। अत्र हेमचन्द्रेण अस्याः समस्यायाः स्वबुद्धिप्रतिभाद्वारा निराकरणं कृतम्। धातुपाठे प्रथमगणे अतिरिक्तगणनिर्देशकानुबन्धं विना केवलधातूनां निर्देशो विद्यते, यथा–भू सत्तायाम, पां पाने, ध्रां गन्धोपादाने इत्यादि। द्वितीयादादिगणे ककारानुबन्धः गणपरिचायकः वर्तते, यथा–अदंक् भक्षणे, भांक् दीप्तौ, यांक् प्रापणे इत्यादि। अत्र जुहुत्यादिगणः अदादिगणान्तर्गत एव स्वीकृतः। दिवादिगणे चकारानुबन्धः प्रतिपादितः, यथा– दिबूच् क्रीडा–ज्येच्छादिषु, झ्रूष्च् जरसि, शोंच् तक्षणे इत्यादि। तुरीयस्वादिगणः तत्र टकारानुबन्धः निर्दिष्टः, यथा–षुंगट् अभिषवे, षिंगट् बन्धने, शिंगट् निशाने इत्यादि। तकारानुबन्धकः तुदादिगणः, यथा–तुदींत् व्यथने, भ्रस्जींत् पाके, क्षिपींत् प्रेरणे इत्यादि। षष्ठः पकारानुबन्धकः रुधादिगणः, यथा–रुधृंपी आवरणे, रिचृंपी विरेचने, पृचैप् संपर्के इत्यादि। अग्रिमः यकारानुबन्धकः स्तनादिगणः, यथा–तनूयी

विस्तारे, षणूयी दाने, क्षणूग् हिंसायाम् इत्यादि। अष्टमः शकारानुबन्धकः क्र्यादिगणः, यथा– डुक्रींग्श् द्रव्यविनिमये, षिंग्श् बन्धने, प्रीग्श् तृप्तिकान्त्योरित्यादि। णकारानुबन्धकः अन्तिमो नवमश्च चुरादिगणः यथा—चुरण् स्तेये, पृण् पूरणे, घृण् स्रवणे इत्यादि। एवंरीत्या धातुपाठस्य गणस्मरणसमस्या समाप्ता। अस्माभिः पूर्वमेवोक्तं यदुभयाचार्ययोः नैकेषु स्थानेषु वैशिष्ट्यमास्ते यस्य तुलनात्मकं विशदविवेचनमग्रे वर्णयिष्यामः।

।। ॐ ।।

# चतुर्थपरिच्छेदः

## ।। उभयोरन्तरम् ।।

संस्कृतव्याकरणस्य रचना प्राचीनकालत एव समभवत्। संस्कृतस्य प्रकाण्ड-वैयाकरणमहर्षिपाणिनेः प्रागपि अनेके प्रभावशालीवैयाकरणाः प्रादुर्बभूवुः, किन्तु आचार्यपाणिनेः पूर्णता तथा प्रभावशालीताकारणेन सूर्यसम्मुखे उडूनामिव तेषां प्रतिभा व्यलीनात् व्याकरणजगति च पाणिनीयप्रकाशो व्याप्नोत्। एतदेव न अपि तु एतद्भास्वरप्रकाशस्य सम्मुखे परवर्तिवैयाकरणानामपि कान्तिरनुद्भासिता। विक्रमस्य द्वादशशताब्द्यामेका हेमीप्रतिभा एव अस्यापवादरुपे समुत्स्फुरिता। एषा प्रतिभा न केवलं प्रकाशं नीत्वा समागता अपि तु तत्प्रकाशे कौमुदीवत् शीतलतायाः संयोगोऽ-प्यासीत्। आचार्यहेमचन्द्रेण शब्दानुशासनेन सह शब्दप्रयोगात्मकद्व्याश्रयकाव्यमपि व्यरचि।

प्रकरणेऽस्मिन् उभयाचार्ययोर्विभिन्नतायाः चर्चायां कालस्य महदन्तरं वरीवर्तते। क्रमेणपूर्वपूर्वकाले व्याकरणस्य स्वरुपमतिविस्तृतमासीत्। किन्तु यथा उदयनाचार्येण न्यायकुसुमाञ्जलौ उक्तम्–

जन्मसंस्कारविद्यादेः शक्तेः स्वाध्यायकर्मणोः।
ह्रासदर्शनतो ह्रासः संप्रदायस्य मीयताम्[१] ।।

वेदादिसम्प्रदायोऽत्यन्तमुच्छिद्यते ह्रासमानत्वात् प्रदीपवत्। पूर्वं मानस्यः प्रजाः। ततः पुत्रमात्रार्थिप्रयुक्तमैथुनजाः, सम्प्रति सम्भोगकामिप्रवृत्यावर्जितजन्मान इति जन्मह्रासः। पूर्वं चरुप्रभृतिषु संस्कारः, ततो जननानन्तरं, इदानीं कथञ्चिदिति संस्कार-ह्रासः। पूर्वं सहस्रशाखस्य चतुर्वेदस्याध्ययनं, तत एकस्याः शाखायाः इत्यादिक्रमेण विद्याह्रासः। तद्वत् अत्रापि बृहस्पतिप्रवचनकाले व्याकृतेः यद् स्वरुपमासीत् तत्स्वरुपम् ऐन्द्रादिव्याकरणे न भविष्यति तथा ऐन्द्रव्याकरणे यत् पदार्थबाहुल्यं (विस्तारः) आसीत्

१. 'न्या. कु.' (द्वितीयस्तबकः, श्लो.३)

तच्चाद्रकाशकृत्स्नादिषु नाविद्यत, अर्थात् क्रमिको ह्रासस्तु जगतो नियमः खलु। पाणिनिकाले संस्कृतं जनव्यवहारभाषा निश्चयेन आसीत्। उदात्तानुदात्तस्वरितानां प्रयोगोऽपि भाषायां प्रचलित एव। अस्मिन् विषये विस्तारेण प्रथमपरिच्छेदे पाणिनि-व्यक्तित्वविषये चर्चा चर्चिता। पाणिनिसमये व्याकरणस्य विस्तृतस्वरुपं प्रचचाल। नवीनव्याकृतिरचनायां तत्समयानुसारम् अतिलघुस्वरुपं संज्ञारहितकार्यनिर्देशादिकं वा तत्कालीनसमाजैः तुच्छत्वेन हेयत्वेन परिगण्यते स्म। व्याकरणे सूत्रपरम्परा एव आसीत्। सूत्रव्याख्यानन्तु गुरुभिः क्रियते। 'व्याख्यानतो विशेषप्रतिपत्तिः न हि सन्देहाद् अलक्षणम्'। हेमचन्द्राचार्येण य'ल्लोकादि' ति (१/१/३) सूत्रं प्रपञ्चितं तस्य व्यापकता पाणिनिकाले विस्तृतरुपेण आसीत्। अत एव सूत्रवृतेः परम्पराऽपि न शिष्टानुसरणम्। कालान्तरे विद्यायाः ह्रासतः कात्यायनमुनिना वार्तिकसूत्राणि व्यरचिषत। तदनु महर्षिपतञ्जलिः बृहत्तमं व्याकरणमहाभाष्यं निर्मितवान्। अत्र व्याकरणपदार्थानां विस्तारेण परिचर्चा वर्तते। कालप्रभावेण एव एषाम् आवश्यकता समुत्पन्ना। अत एव 'उत्तरोत्तरं मुनीनां प्रामाण्यम्' इत्यस्य आशयः उत्तरोत्तरमुनीनां पूर्वपूर्वमुनीनां वाक्ये तात्पर्यम् अन्यथा 'प्रमाणभूत आचार्यो दर्भपवित्रपाणिः.......। तत्राशक्यं वर्णेनाप्यनर्थकेन भवितुम्, किं पुनरियता सूत्रेण[१]'। 'सामर्थ्ययोगान्नहि किञ्चिदस्मिन् पश्यामि शास्त्रे यदनर्थकं स्यात्[२]' इति भाष्यवाक्ये अप्रमाण्यापत्तिः स्यात्। अस्मिन् विषये प्रथमपरिच्छेदे तथा तृतीयपरिच्छेदे विस्तारो विहितः।

कथनस्य तात्पर्यं वर्तते यत् पाणिनिसूत्रे न कुत्रापि अपूर्णता येन वार्तिकसूत्र-निर्माणं वा आवश्यकम्, अपि तु देशकालपरिस्थित्यनुसारं आचार्यपाणिनेः सूत्रतात्पर्यं गुप्तरहस्यं वा सुधीभिः पाठकोद्धाराय प्रकाशितम्। आचार्यहेमचन्द्रः स्वशब्दानुशासनं सरलतरं कृतवान्। तथा अनेन केचनेतर-शब्दानां सिद्धिरपि निर्दिष्टा। सारांशरुपेण वक्तुं शक्यते यत् त्रिमुनिना व्याकरणस्य यत् स्वरुपं विनिर्मितं तत्सर्वम् आचार्यहेमचन्द्रेण स्वशब्दानुशासने प्रायः सुचारुरुपेण सुग्रथितम्। हेमचन्द्रेण स्वसमये समुपलब्धानां कातन्त्र-पाणिनीय-सरस्वतीकण्ठाभरण-जैनेन्द्र-शाकटायनादिसमस्तव्याकरणग्रन्थानामालोडनं

१. महाभाष्यम् १/१/१ पृष्ठ. ३६

२. महाभाष्यम् ६/१/७७

कृत्वा सारो गृहीतः तथा स्वीयप्रतिभाकौशलेन सुविस्तृतं चमत्कृतञ्च।

प्रस्तुतप्रकरणे शब्दानुशासनस्य अध्ययनं कृत्वा उभयोरन्तरं तथा उभयोराचार्ययोः मौलिकतां परीक्षिष्यामहे।

सर्वप्रथमं पाणिनिहेमव्याकरणयोः संज्ञाप्रकरणविषये चर्चयिष्यामहे।

संस्कृतभाषायां प्रायः सर्वेषुग्रन्थेषु पारिभाषिकसंज्ञानां प्रकरणं भवति। उक्तञ्च महाभाष्ये आचार्या चारात्संज्ञासिद्धिः .... तद्यथा लौकिकेषु वैदिकेषु च कृतान्तेषु। लोके तावन्मातापितरौ पुत्रस्य जातस्य संवृतेऽवकाशे नाम कुर्वाते - देवदत्तयज्ञदत्त इति। तयोरुपचारादन्येऽपि जानन्ति इयमस्य संज्ञेति। वेदे याज्ञिकाः संज्ञां कुर्वन्ति - स्फ्यो यूपश्चषाल इति। एवमिहापि, इहैव तावत्केचिद्व्याचक्षणा आहुः - वृद्धिः शब्दः संज्ञा, आदैचः संज्ञिन इति[१]। अतः प्रकरणारम्भे संज्ञाविधानमावकम्, येन ग्रन्थे संक्षेपेण कार्यनिर्देशो भवितुं शक्यते।

शब्दाचार्यैः व्याकृतौ विभिन्नप्रकारेण स्वीयसंज्ञानां सांकेतिकरुपं प्रदत्तम्। कुत्रचित् एकतायामपि विभिन्नता प्रचुरमात्रायां दृश्यते। अत एव व्याकरणस्य विभिन्न-स्वरुपाणि प्रचलितानि एकस्यामेव संस्कृतभाषायाम्।

हेमचन्द्रः स्वव्याकरणे प्रायः व्यावहारिकपक्षाश्रयणं कुरुते। अनेन प्रथमप्रकरणे संज्ञानां न्यूनता सम्पादिता। स्वरसंज्ञायां ह्रस्व-दीर्घ-प्लुत-नाम-समान-सन्ध्यक्षररुपेण षट्संज्ञाः प्रस्तुताः। तथा व्यञ्जनेषु संज्ञाद्वारा विभाजनप्रसङ्गे धुट्, वर्गः घोषवान्, अघोषः, अन्तस्थाः, शिट् इत्यवंरीत्या अत्रापि षट्संज्ञाः, स्वरव्यञ्जनयोः संज्ञानां विवेचनानन्तरं स्व-संज्ञायाः विधानमपि विद्यते[२]।

तदनु विभक्ति-पद-नाम-वाक्यसंज्ञानां वैज्ञानिकरीता प्रस्तुतिर्विहिता। पाणिनीयव्याकरणे वाक्यसंज्ञायाः विधानं कात्यायनः कृतवान् 'एकतिङ्वाक्यम्' अत्र हेमचन्द्रः स्पष्टं करोति यत् 'सविशेषणमाख्यातं वाक्यम्' (१/१/२६) (त्याद्यन्तं

१. महाभा. - १/१/३ पृ. १५७

२. तुल्यस्थाना. १/१/

पदमाख्यातम्) साक्षात् पारम्पर्येण वा यान्याख्यातविशेषणानि तैः प्रयुज्यमानैरप्रयुज्यमानैर्वा सहितं प्रयुज्यमानमप्रयुज्यमानं वा आख्यातं वाक्यसंज्ञं भवति। अत्र उदाहरणानि –धर्मो वः स्वम्, ददाति नः शास्त्रम् शीलं ते स्वम्। अत्र प्रथमोदाहरणं प्रयुज्यमानविशेषणं प्रयुज्यमानमाख्यातम्, द्वितीयं प्रयुज्यमानमाख्यातम् अप्रयुज्यमानविशेषणम्, तृतीयोदाहरणम्-प्रयुज्यमान विशेषणम् अप्रयुज्यमानमाख्यातम्। अत्र आख्यातेविशेषणस्य अर्थः अव्ययम्, कारकम् कारकविशेषणानि, क्रियाविशेषणानि इत्येषां साक्षात् परम्परया वा उपस्थितिः। हेमचन्द्रस्य वाक्यलक्षणं सरलतया स्पष्टीकरोति। हेमचन्द्रेण सप्तसूत्रेषु अव्ययसंज्ञा निरुपिता। अत्र निपातसंज्ञायाः अन्तर्भावी अव्ययसंज्ञायामेव कृतः। चादिशब्दानां निपातसंज्ञामस्वीकृत्य अव्ययरुपेणैव प्रतिपादिताः। एतत् संक्षिप्तीकरणस्य लघुतमः प्रयासोऽत्र प्रतिपादितः। इत् तथा संख्यावत् संज्ञामपि पूर्णरुपेण निरुपितवान्। हेमचन्द्रः अनुनासिकस्य व्युत्पत्तिगतम् अर्थं स्वीकरोति अतः 'मुखनासिकावचनोऽनुनासिकः' (........) पाणिनीयव्याकरणेन समं अत्र सूत्रनिर्माणस्य आवश्यकता नास्ति।

पाणिनेः सवर्णसंज्ञाविधायकं 'तुल्यास्यप्रयत्नं सवर्णम्' (१/१/९) सूत्रं वर्तते। हेमचन्द्रेण एतत्संज्ञार्थं तुल्यस्थानास्यप्रयत्नः न कापि विशेषता। अपि तु पाणिनेरेवानुकरणं प्रतीयते। सत्यमेतत् यत् सवर्णसंज्ञायाः स्थाने स्वसंज्ञायाः विधानं हेमचन्द्रेण कृतम्। उभयोः शब्दाचार्ययोः भावस्तु समान एव।

पाणिनिहेम्नोः संज्ञासु एकं मौलिकान्तरं वर्तते यतत्र हेमव्याकरणे प्रत्याहाराणां सर्वथा अभावो विद्यते। वर्णमालायाः वर्णमाश्रित्य एव हेमचन्द्रः संज्ञाविधानं करोति। पाणिनिः प्रत्याहारद्वारा संज्ञां निरुपयति येन संज्ञाबोधाय प्रत्याहारक्रमः आवश्यकः। हेमव्याकरणे प्रक्रियासारल्यं दरीदृश्यते।

पाणिनिः अनुस्वारविसर्ग-जिह्वामूलीयो-ध्मानीयानीयानां व्यञ्जनविकारं कथयति। वस्तुतः अनुस्वारः मकारजन्यः नकारजन्यो वा वर्तते। सकारस्य रेफस्य वा निसर्गो विद्यते। जीह्वामूलीयोपध्मानीयौ, क्रमशः कखे पफे च परे पूर्वस्थितस्य विसर्गस्यैव विकारो भवति। पाणिनिः प्रस्तुतस्थले अनुस्वारादीनां प्रत्याहारसूत्रेषु (= वर्णमालायाम्) स्वतन्त्ररुपेण उल्लेखं न कृतवान्। अस्मिन् विषये परवर्तिपाणिनीय

-वैयाकरणैः विशदचर्चा चर्चिता यत् एषां वर्णानां स्वरेषु पाठः स्वीक्रियेत वा व्यञ्जनेषु। आचार्यकात्यायनः अस्य अन्तर्भावः उभयत्र करोति। पतञ्जलिरपि एतत् समर्थयति। अत्र हेमचन्द्रः अनुस्वार-विसर्ग-जिह्वामूलीयोपध्मानीयानाम् 'अं अः X क X प शषसाः शिट्' (१/१/१६) सूत्रद्वारा शिट्संज्ञेकं स्वीकरोति। अनेन स्पष्टं भवति यत् एषां सत्तां व्यञ्जनेषु अभ्युपगच्छति आचार्यः। अत्र विसर्गस्यापि प्रवेशो विद्यते। शाकटायनव्याकरणेऽपि उपयुक्तानां व्यञ्जनेषु अन्तर्भावो प्रदत्तः। मन्ये यदत्र हेमचन्द्रः पाणिन्यपेक्षया शाकटायनेन अधिकप्रभावितो वर्तते।

पूर्वोक्तविवेचनेन एतद् वक्तुं शक्यते यत् हेमचन्द्रेण स्वावश्यकानुसारेण संज्ञानां विधानं विहितम्।

पाणिनिरच्सन्धिमुक्तवान् हेमचन्द्रः स्वरसन्धिं प्रतिपादितवान्। हेमचन्द्रः गुणसन्धौ ऋ इत्यस्य स्थाने अर् ऌ इत्यस्य स्थाने अल् कृतवान्। पाणिनिः अस्य सिद्धिः 'उरण् रपरः' (१/१/५१) इति पृथग् सूत्रेण करोति। हेमचन्द्रः एकस्मिन् सूत्रे एव उभयकार्यं सम्पादयति। हेम्ना ऐ-औ इत्येतौ सन्धिस्वरौ निगदितौ, पाणिनिव्याकरणे परवर्तिवैयाकरणैः चर्चैषा निरुपिता।

पाणिनिना 'एङि पररुपम्' (६/१/९४) सूत्रद्वारा आत् उपसर्गादेङादौ धातौ परे पररुपमेकादेशम् अनुशासितम्। हेमचन्द्रः 'उपसर्गस्यानिणेधेदोति' (१/२/१९) सूत्रेण अस्य लुग् विधानं कृतम्। पाणिनिना 'अयादिसन्धये एचोऽयवायावः' (६/१/७८) इत्यनेन अय्-आय्-आव् आदेशाः प्रतिपदिताः। सिद्धहेमव्याकृतौ 'एदैतोऽयाय्' (१/२/२३) तथा 'ओदौतोऽवाव्' (१/१/२४) इति सूत्रद्वयं विरचितम्। स्वरसन्धौ हेमचन्द्रः 'ह्रस्वोऽपदे वा' (१/२/२२) नैतनसूत्रं वर्तते। पाणिनिशब्दानुशासने अस्य चर्चा नास्ति। कुमारी + अत्र इत्यत्र पाणिनीयास्तु इषा 'अक्षादीनां छन्दसि प्रकृति भावो वक्तव्यः' इति वार्तिकानुसारेण छन्दसि कार्यम् कुर्वन्ति। मन्ये हेमचन्द्रस्य नदि एषा, नद्येषा इति उभौ प्रयोगौ आस्ताम्। अत एव अस्य अनुशासनं प्रतिपादितम्। गव्यति, गव्यते, नाव्यति, नाव्यते, लव्यम् तथा लाव्यम् इत्येषां प्रयोगाणां साधुत्वार्थं हेम्ना 'य्यक्ये' (१/२/२५) सूत्रं लिखितम्। एषां रुपाणां सिद्ध्यर्थं पाणिनिः 'वान्तो यि प्रत्यये' (६/२/७९) तथा 'धातोस्तस्मिन्निमित्तस्यैव' (६/१/८०) सूत्रे द्वे विरचितवान्।

अभिप्रायस्तु एतद् वर्तते यत् लव्यम्, लाव्यम् इत्यनयोः प्रयोगयोः साधुत्वाय (१/२/२५) इति सूत्रं रचितम्, पाणिनिरत्र (६/१/८०) पृथग् सूत्रनिर्माणं करोति। पाणिनेः पूर्वरुपपररुपयोः कार्यं हेमचन्द्रः लुक्द्वारा निर्वहणं कुरुते। पाणिनिना यत् प्रकृतिभावाः प्रतिपादितः हेमचन्द्रः तदेव असन्धिशब्देन ब्रूते स्म।

उ + इति विति तथा ऊँ + इति एषां रुपाणां सिद्ध्यर्थं पाणिनीः 'उञः' (१/१/१७) तथा 'ऊँ' (१/१/१८) सूत्रद्वयं व्युत्पादितम्। हेम पूर्वोक्तरुपाणां सिद्धीः 'ऊँ चोञ्' (१/२/३९) सूत्रद्वारा अनुशासितवत्।

पाणिनिः हल्सन्धिपदेन व्यहरति हेमचन्द्रः व्यञ्जनसन्धिपदेन। व्यञ्जनसन्धौ कवर्गादिक्रमेण वर्णाणां ग्रहणं कुरुते हेम, पाणिनिस्तु प्रत्याहारक्रमेण। जिह्वामूलीयोपध्मानीयौ, विसर्गस्य पाणिनि निर्दिष्टौ, हेम्ना 'रः कखपफयोः X क .... पौ' (१/३/५) सूत्रे रेफस्यैव विसर्गः उभौ च प्रतिपादितौ। यत् कार्यं पाणिनिना निसर्गेण कृतम् तदेव कार्यं हेम्ना रेफेण समपादि।

आचार्यहेमचन्द्रः 'नोऽप्रशानोऽनुस्वारानुनासिकौ च पूर्वस्याधुट् परे' (१/३/८) सूत्रेण नकारस्यैव सकारविधानं करोति, पाणिनिरत्र नस्य रुः, रोः सकारं (न = रु = स्) करोति, तथा च अनुनासिकानुस्वारविध्यर्थम् 'अत्रानुनासिकः पूर्वस्य तु वा' (८/३/२) तथा 'अनुनासिकात्परोऽनुस्वारः' (८/३/४) सूत्रे द्वे विरचितवान्। हेम अत्र एकसूत्रेणैव सर्वं कार्यं निष्पादितवत्। 'स्सहि समः' (१/३/१२) इत्यत्र पतञ्जलेः 'समो वा लोपमेके' इति सिद्धान्तस्यापि अन्तर्भावो विहितः। अर्थात् हेमचन्द्रेण पाणिनीयतन्त्रस्य अवगाहनं कृत्वा विश्वासाम् विशेषतानां स्वशब्दानुशासने समावेशो कृतः।

हेम्ना 'सम्राट्' (१/३/१६) सूत्रे सम्राट् इति शब्दं विलिख्य सम्राट् शब्दस्य सिद्ध्यर्थं मकाराभावे निर्दिष्टः। पाणिनिरत्र 'मो राजि समः क्वौ' सूत्रद्वारा अनुशास्ति। पाणिनिः सूत्रेण सकारस्य यत्त्वं विधाय तदनु तस्य लोपविधानं प्रतिपादितवान्। हेमचन्द्रानुशासने लाघवाश्रयणं दृश्यते। हेमचन्द्रेण 'अस्पष्टाववर्णात् त्वनुञि वा' (१/३/२५) ईषत्स्पष्टतरयोः वकारयकारयोः विधानं कृतवान्। पाणिनिः.........

लघुप्रयत्नः उक्तवान्।

हेमचन्द्रेण अनाङ्माङो दीर्घाद् वा छः (१-३-२८) सूत्रेण छत्वविधानमकरोत्, पाणिनिस्तु .............. (६/१/७५) सूत्रद्वारा तकारस्य श्चुत्वं कृत्वा साधितम्।

पाणिनेः सूत्रं वर्तते 'आङो माङोश्च' (६/१/७४) अनेन तुगागमः, किन्तु हेमचन्द्रः आङ्माङ् वर्णयित्वा दीर्घात् पदान्तात् परस्य छस्य विकल्पेन विधानं करोति। आङ्-माङ् आभ्यां नित्यछस्यविधानमकरोत्।

हेमचन्द्रः तच् रशेते, तच् शेते प्रयोगयोः 'ततः शिटः' (१/३/३६) द्वारा शस्य द्वित्वम् अनुशास्ति। अत्र हेमचन्द्रस्य मौलिकत्वमास्ते। हेमचन्द्रस्य विसर्ग-सन्धिनिरुपणे न किमपि वैशिष्ट्यम्, अपि तु विसर्ग रेफम् उक्त्वा व्यञ्जनसन्धौ एव स्थापितम्। 'रो रे लुग् दीर्घश्चादिदुतः' (१/३/४१) इति सूत्रे 'रो रि' (८/३/१४) तथा 'द्रलोपे पूर्वस्य दीर्घोऽणः' (१/३/५९) सूत्रे शषसे परे वर्गप्रथमस्य द्वितीयाक्षरो विहितः। यथा-ख्षीरम्, क्षीरम्, अफ्सराः, अप्सरा इत्यादि। एतद् अभिनवमेव वर्तते समस्तव्याकरणेषु।

शब्दरुपाणां परिनिष्पत्तिं हेमचन्द्रः प्रथमाध्यायस्य पादे प्रारभते। पाणिनिः अजन्तशब्दानां साधनिकायाः पूर्वम् 'अर्थवद् धातुरप्रत्ययः प्रातिपदिकं' (१/२/४५) द्वारा प्रातिपदिकसंज्ञां करोति। हेमचन्द्रः 'अधातुविभक्तिवाक्यमर्थवन्नाम' (१/१/२७) सूत्रेण नाम संज्ञां दर्शयति अर्थात् - पाणिनिः यं प्रातिपदिकसंज्ञात्वेन उक्तवान् तदेव हेमचन्द्रः नामसंज्ञात्वेन निर्दिष्टवान्। नात्र किञ्चिद् अर्थकृद् वैरुप्यम्।

पाणिनिः 'जश्शसोः शि' (७/१/२०) सूत्रद्वारा जसः स्थाने शि प्रत्ययं करोति। हेमचन्द्रः 'जस इः' द्वारा जस् प्रत्ययस्य सम्पूर्णस्य स्थाने इकारविधानं विधत्ते। अत्र पाणिनिवत् अन्तिमवर्णस्य आदेशापत्तिः नास्ति। हेमचन्द्रेण संज्ञालाघवं प्रायः कृतम्। तस्य एकमधिकमुदाहरणं यत् सः पाणिनिवत् सर्वादिशब्दानां सर्व-नामसंज्ञाम् अकृत्वा सर्वादित्वेन एव व्यवहृतवान्। पाणिनिः सर्वादिशब्दे षष्ठीबहु-वचने सुट् आगमं निर्दिष्टवान्। हेम्ना आम् प्रत्ययस्थाने साम् इत्यस्य विधानमकरोत्।

अजन्तस्त्रीलिङ्गमध्ये लतायै लतायाः लतायामित्यस्य सिद्ध्यर्थं यत्र पाणिनिः प्रक्रियाधिक्येन 'याडापः' (७/३/११३) सूत्रेण याट् आगमं कृत्वा वृद्ध्या दीर्घेण च साधुत्वं दर्शयति। तत्र हेमचन्द्रः 'आपो ङितां यै-यास्-याम्' (१/४/१७) सूत्रेण विभक्तीनां स्थान एव एषां प्रत्ययाणां विधानं वर्तते।

मुनौ इत्यस्मिन् प्रयोगे पाणिनिः 'अच्च चेः' (७/३/११) सूत्रेण इकारस्य अकारः ङि स्थाने च औकारः प्रतिपादितवान्, तथा वृद्धिं कृत्वा मुनौ साधितम्। हेमचन्द्रः अत्र लाघवमाश्रित्य 'ङि डौ' (१/४/२५) सूत्रद्वारा ङि प्रत्ययस्य स्थाने डौ आदेशम् अनुशास्ति। डित्वात् पूर्व टि भागस्य लोपं कृत्वा मुनौ कार्यं निर्वाहयति।

## ॥ एकस्य अपरेण गतार्थता नवा ॥

इति तु निश्चप्रचं यदुभयव्याकृती स्वगतवैशिष्ट्यं मौलिकत्वञ्चावहत इत्यत्र तु न काऽपि सुधीनां विचिकित्सा, तथाऽपि समेसां चेतसि एका पृच्छा तु समुद्भवति यदेकेन व्याकरणशास्त्रेणाऽपराऽनुशासनस्य गतार्थता नवेति विषयानुषङ्किविप्रतिपत्तिं परितोषाय विवृण्महे।

आचार्यहेमचन्द्रेण यद्यपि महता परिश्रमेण साङ्गोपाङ्गव्याकरणं निरमायि। तथाऽपि पाणिनीयतन्त्रं विहाय सूक्ष्मतमपदार्थान् विवेचयितुं कः प्रभुः अस्मिञ्जगति खलु। उक्तञ्च 'काणादं पाणिनीयञ्च सर्वशास्त्रोपकारम्'। हेम-व्याकरणेऽपि पाणिनीय-तन्त्रस्य छाया यत्र-तत्र-सर्वत्र वर्तत एव। हेमचन्द्रेण व्याकरणस्य मङ्गलाचरणे अस्य दिङ्मात्रेण निर्देशः कृतः। 'प्रणम्य परमात्मानं श्रेयः शब्दानुशासनम्। आचार्यहेमचन्द्रेण स्मृत्वा किञ्चित् प्रकाश्यते'।। अत्र श्लोकघटकं 'स्मृत्वा[१]' इति पदं पाणिनीयतन्त्रपरम्, हेमव्याकरणस्य अवचूरिमध्ये स्वयं हेमचन्द्रेण लिखितं यत् - 'आचार्यहेमचन्द्रेण किञ्चित्[२] पाणिन्यादिकमुपयुज्य अथवा किञ्चिद् गुर्वाम्नाय-तत्त्वं ध्यात्वा किञ्चित् = अल्पं वा प्रकाश्यते .......'। हेमव्याकरणस्य तृतीयसूत्रं 'लोकात्' (१/१/३) इत्यपि अत्र उपजीव्योपजीवकभावमेव ज्ञापयति।

वस्तुतः अस्मिन् विषये कस्याऽपि प्रमाणस्य आवश्यकता न वरीवर्तते, सर्वे व्याकरणविदः जानन्त्येव यत् गहनपदार्थानां विवेचानावसरे बेहन्न्यासाद्याकरग्रन्थे पाणिणितन्त्रस्य विचारः सर्वत्र दरीदृश्यते।

तद्विरुद्धं पाणिनीयव्याकरणस्य तन्त्रस्य वा गतार्थता हेमव्याकरणेन दुःसाध्या एव। वस्तुतः आचार्यहेमन्द्रेण संक्षिप्तरुपेण व्याकरणं गुर्जरनरेशसम्मुखे स्थापितम्, किन्तु व्याकरणशास्त्रस्य गहनपदार्थानां तत्वचिन्तनं पाणिनीयतन्त्राऽऽश्रितमेवाऽऽस्ते।

अतोऽन्यव्याकरणेन समं हैमव्याकरणस्याऽपि गतार्थता पाणिनीयव्याकरणेन बोभवीति। इत्यलमति विस्तरेण।

१. सि.हे.शब्दानुशासनम् (मध्यमवृति अवचूरिसहिता) पृ. लाइन-१२

२. स्मृत्वा = उपदेश पारतन्त्र्येण कृत्वा - बृ. न्यास. पृ-१ लाइन-५०

देवानाम् इत्यत्र पाणिनिः नुट् आगममकरोत्, किन्तु हेम 'ह्रस्वापश्च' (१/४/३२) द्वारा आमः स्थाने नाम् आदेशं प्रतिपादितवान्। हेम पाणिनेः 'त्रेस्त्रयः' (६/१/५३) इति सूत्रं पाणिनिवत् एव वर्तते। 'ह्रस्वस्य गुणः' (७/३/१०८) इति सूत्रमपि उभयत्र समानमेव।

पाणिनि कुर्वत् शब्दसिद्ध्यर्थम् 'उगिदचां सर्वनामस्थाने ऽधातोः' (७/१/७०) द्वारा नुम् आगमः तथा 'संयोगान्तस्य लोपः' (८/२/२३) द्वारा तकारलोपस्य नियमनं करोति। हेम 'ऋदुदितः' (१/४/७०) द्वारा तकारस्य स्थाने नकारम् अनुशास्ति।

उशनस्-शब्दस्य सम्बोधने रुपसिद्ध्यर्थं कात्यायनः 'अस्य सम्बुद्धौ वाऽनङ् नलोपश्च वा वाच्यः' इति वार्तिकं कात्यायनोऽरचयत्। एतद् वार्तिकसिद्धान्तं हेमचन्द्रः 'वोशनशो नश्चामन्त्र्ये सौ' (८१/४/८०) सूत्रे स्थापितवान्।

पाणिनिः पूर्ववर्तिणाम् अनेकेषाम् आचार्याणाम् उल्लेखं कृतवान्। कुत्रचित् नामोल्लेखः प्रशंसार्थमपि वर्तते, किन्तु प्रायः तत्र तेषां सिद्धान्तानां प्रतिपादनं विद्यते। हेमचन्द्रः स्वसूत्रेषु तत्तद्रूपाणि एव संकलितवान्, अत्र पाणिनिः एषां प्रयोगाणां सिद्धिः प्रक्रियाद्वारा कुरुते।

इदं शब्दस्य पुल्लिङ्गस्त्रीलिङ्गैकवचनरुपसिद्ध्यर्थं पाणिनेः पृथग् नियमाः सन्ति। सः 'इदमो मः' (७/२/१०८) द्वारा मकारविधानं तथा 'इदोऽय् पुंसि' (७/२/११) द्वारा 'इद' भागस्य 'अय' विधानं कुरुते। स्त्रीलिङ्गे 'इयम्' रुपस्य परिनिष्ठितत्वाय 'यः सौ' (७/२/११०) सूत्रेण दस्य यकारो विहितः, किन्तु अत्र हेमचन्द्रः अयम्, इयम् रुपे साध्नोति। अत्र हेमचन्द्रस्य प्रक्रियासारल्यं विद्यते। हेम-चन्द्रेण परवर्तिवैयाकरणानां प्रक्रियासौकर्यस्य सर्वाङ्गिण्वेन प्रयोगः कृतः

पाणिनिः त्यद् यद् आदिशब्दानां पुल्लिङ्गे साधुत्वाय 'त्यदादीनलः' (७/२/१०२) सूत्रद्वारा अकारविधानमकरोत्, अस्यां प्रक्रियायां त्वदादितः द्विपर्यन्तमेव गृह्णीयात् तदर्थं भाष्यकारः 'द्विपर्यन्तानामवेढिटः' द्वारा नियमनं कुरुते। हेमचन्द्रेण भाष्यकारस्य पूर्वोक्तसिद्धान्तं उपयुज्य 'आद्वेरः' (२/१/४१) सूत्रद्वारा तदेव तत्त्वं स्पष्टीकृतम्। पाणिनिः 'अचि श्नुधातुभ्रूवांय्वोरियङुवङौ' (६/४/७७) द्वारा इकारोकारयोः स्थाने क्रमेण इयङुवङौ अनुशास्ति। अत्र हेमचन्द्रः 'धातोखिर्णोवर्णस्येयुव् स्वरे प्रत्यये' (२/१/५०) सूत्रद्वारा इय्-उव् मात्रस्य विधानमकुरुत।

पाणिनिः विदुषः शब्दसिद्ध्यर्थं 'वसोः सम्प्रसारणम्' (६/४/१३१) सूत्रद्वारा सम्प्रसारणमकरोत् तथा षत्व-विधानाय 'विदुषः' इत्यस्य साधुत्वं प्रदर्शितवान्। हेमचन्द्रः अत्र 'क्वसुष् मतौ च' (२/१/१०५) सूत्रेण वस् इत्यस्य उष् आदेशं कृतवान्। वृत्रघ्नः इति प्रयोगसाधुत्वाय पाणिनिः हन् धातुघटकस्य अकारस्य लोपं कृत्वा हकारस्य स्थाने 'हो हन्तेर्ञ्णिन्नेषु' (७/३/५४) सूत्रं प्रणिनाय। हेमचन्द्रः हन् इत्यस्य स्थाने घ्न आदेशमनुशास्ति।

कारकप्रकरणस्य समीक्षां वयं पञ्चमपरिच्छेदे एव चर्चिष्यामहे।

पाणिनेरष्टाध्यायिनः स्त्रीप्रत्ययप्रकरणं चतुर्थाध्यायस्य प्रथमपादतः प्रारभ्य ७७ सूत्रपर्यन्तं प्रचलति। आदौ सुप् प्रत्ययानां विधानं वर्तते। तदनु तृतीयसूत्रं 'स्त्रियाम्' (४/१/३) स्त्र्यधिकारं प्रतिपादति। प्रत्ययेषु सर्वप्रथमं टाप्ङीप् वर्तते। तदनन्तरं डाप्, ङीन्, ङीष् तथा ती इति प्रत्ययाः सुव्यवस्थापितास्सन्ति।

हेमव्याकृतौ द्वितीयाऽध्यायस्य कृत्स्नतुरीयपादे स्त्रीप्रत्ययाः समाकलिताः सुप्-प्रत्ययाणां समावेशं विना 'स्त्रियां नृतोऽस्वस्रादे र्ङी' (२/४/१) सूत्रे एव 'स्त्रियाम्', इति पदं वर्तते, यस्य आवश्यकता स्त्रीत्वज्ञानाय विद्यते, हेमचन्द्रेण इत एव स्त्रीत्वाधिकारोऽभ्युपगतः। पाणिनिः ऋकारान्तनकारान्तशब्दाभ्यां ङीप् प्रत्ययविधानार्थम् 'ऋन्नेभ्यो ङीप्' (४/१/५) इति पृथक् सूत्रं वर्तते, तथा 'न षट् स्वस्रादिभ्यश्च' (४/१/१०) द्वाराऽत्र ङीप्टाप्प्रत्ययोः प्रतिषेधं करोति ग्रन्थकारः। पाणिनिः 'उगितश्च'

(४/१/६) द्वारा भवती, प्राची सदृशाणां शब्दानां साधुत्वं प्रतिपादितवान्, किन्तु हेमचन्द्रः एतदर्थम् 'अधातुदृदितः' (२/४/२) तथा 'अञ्च' (२/४/३) सूत्रद्वयं विनिर्मितवान्। अत्यन्तलाघवप्रियहेमचन्द्रस्यैतद् गौरवं स्पष्टमेव।

पाणिनिः आदौ स्त्रीप्रत्यये 'अजाद्यतष्टाप्' (४/१/४) सूत्रमलिखत्। हेम अस्यां प्रकरणिकायां परिवर्तनं चक्रे। हेमशब्दानुशासने प्रथमं ङीप् प्रत्ययस्य प्रकरणं विद्यते, तदन्ते तन्निषेधकौ 'नोपान्त्यवतः' (२/४/१३) तथा 'मनः' (२/४/१४) नियमौ स्तः। आभ्यां सूत्राभ्याम् अन्नन्तात् मन्नन्तात् शब्दात् डित् आप् प्रत्ययस्य विधानं कृतवान्। तदनु 'अर्षादेः' सूत्रं विद्यते। पाणिनिः कुमार्यादिशब्दानां साधुत्वाय 'वयसि प्रथमे' (४/१/२०) सूत्रमरचयत्, यस्य तात्पर्यं वर्तते यत् प्रथमावस्थायाः प्रातिपदिकशब्दात् स्त्रीलिङ्गे ङीप् प्रत्ययो भवति। हेमचन्द्रः प्रोक्तस्थले 'वयस्यनन्त्ये' (२/४/२१) सूत्रं विद्यते। अत्र अन्तिमावस्था वृद्धावस्था तद्भिन्नार्थप्रातिपदिक शब्दात् ङीप्रत्ययं विहितवान्। यथा–कुमारी, किशोरी, वधूटी। विगतस्थले पाणिनि-सूत्रानुसारं वधूटी तथा किशोरी इत्यनयोः शब्दयोः सिद्धिः दुःसाध्या। यतो हि उभौ शब्दौ प्रथमावयस्य-वाचिनौ न स्तः, पाणिनेः दोषपरिमार्जनाय कात्यायनः 'वयस्य चरमे इति वाच्यम्' वार्तिकमरचयत्।

पाणिनिः बह्वादिगणपठितशब्दानां स्त्रीलिङ्गे वैकल्पिक-ङीप् प्रत्ययस्य विधानमकरोत्। उपर्युक्तगणे पद्धतिशब्दस्यापि परिगणना कृता, किन्तु पद्धतिः, पद्धती इत्यनयोः सिद्धि र्भवति, अत्र हेमचन्द्रः 'पद्धतेः' (४/१/८७) इति सूत्रम् उभयत्र सममेव।

अव्ययीभावसमासप्रकरणे हेमव्याकरणे निम्नोक्तरुपेण मौलिकत्वेन वैशिष्ट्यं दरीदृश्यते।

१) पाणिनिः 'अव्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासम्प्रतिशब्द-प्रादुर्भावपश्चाद्यथानुपूर्व्यायौगपद्यसादृश्यसम्पत्तिसाकल्यान्तवचनेषु' (२/१/६) सूत्रं लिलेख। प्रयोगस्य प्रक्रियानुसारमेकस्मिन् सूत्रनिबन्धने असंगतिरभवम्, यतो हि केवलं अव्ययस्य विभक्त्याद्यर्थाद् अतिरिक्तार्थेऽपि समासो भवति।

पाणिनिः केशा-केशि मुसला-मुसलि दण्डा-दण्डि इत्यादि शब्देषु बहुव्रीहि समासः स्वीकृतः। उक्त प्रयोगेषु समासान्तरेषु 'इच् कर्मव्यतिहारे' (५/४/१२७) तथा 'द्वि दण्डादिभ्यश्च' (५/४/१२८) सूत्रद्वारा इच् प्रत्ययस्य विधानमकुरुत। हेम्ना विपरीतं उपर्युक्तप्रयोगेषु अव्ययीभावसमासोऽभ्युपगतः। अस्यै प्रक्रियायै हेम्नः 'युद्धेऽव्ययीभावः' (३/१/२६) सूत्रं व्यरचि। हेम्नः एतदेव वैशिष्ट्यं यत् सः पूर्वोक्त स्थलेषु अव्ययीभावमनुशास्ति।

पाणिनिव्याकृतौ अव्ययं विभक्तिसमीप. इत्यादि सूत्रेषु 'यथा' शब्दः समागतोऽस्ति। शाब्दिकैः तेषां चत्वारोऽर्थाः स्वीकृता (१) योग्यता (२) वीप्सा (३) पदार्थानतिवृत्तिः (४) सादृश्यम्।

पूर्वोक्तव्याख्यानुसारमेव अनन्तरमुपात्तं 'यथाऽसादृश्ये' (२/१/७) इति पाणिनिसूत्रसंगति सञ्जायते। सूत्रार्थस्तु 'यथा' शब्दस्य सादृश्यभिन्नार्थे समासो भवति। अस्योदाहरणम् 'यथा हरिस्तथा हरः' इत्यत्र समास रीधनमेव। अर्थात् 'यथा' इत्यर्थे बहुनि अव्ययानि सन्ति, तेषु 'यथा' इत्यस्य समासो सादृश्यभिन्नार्थे एव भवति।

हेम 'विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभाव....अव्ययम्' (३/१/३९) सूत्रात् 'यथा' इत्यव्ययं अपाकरोत् तथा च 'योग्यतावीप्सार्थानतिवृत्तिसादृश्ये' (३/१/४०) इति पृथक् सूत्रं लिलिख, अस्य तात्पर्यं विद्यते यत् अस्य तुरीयार्थेषु कस्यापि अव्ययस्य समासो भवति। यथा–अनुरुपं, प्रत्यर्थं, यथाशक्ति, सशीलमित्यादि। तदनु 'यथाऽथा' (३/१/४१) इति सूत्रेण 'यथा हरिः तथा हरः' इतिं प्रयोगाणां परिनिष्पत्तिः हेम्ना सम्पादितम्। उपर्युक्त प्रकरेषु हेम स्वकौशल्यं प्रदर्शितवान्। हेमचन्द्रमते 'यथा' शब्दो द्विधा विद्यते।

(अ) प्रथमप्रकारवाचि 'यथा' शब्दः यत् शब्दात् 'था' प्रत्ययं कृत्वा निष्पत्ति र्भवति।

(ब) द्वितीयप्रकारवाचि अव्युत्पन्नोऽयं 'यथा' शब्दः। 'यथा' शब्दस्य द्विधारुपानुसारेण समासस्थलीयं तथा असमासस्थलीयमिति भेदद्वयं वर्तते। अस्मिन्

यथा शब्दे 'था' प्रत्ययो नास्ति, एतादृशस्य 'यथा' शब्दस्य समासो भवति। यथा-यथारुपं चेष्टते, यथा सूत्रम् अधीते, परन्तु 'था' प्रत्ययान्तो 'यथा' शब्दो विद्यते, तत्र समासो न भवति। यथा—'यथा हरिस्तथा हरः' अत्र समासो न अनेन प्रकारेण 'यथा चैत्रस्तथा मैत्रः' इत्यत्रापि समासाभावो विद्यते। अनेन प्रकारेण हेमचन्द्रेण पाणिन्यपेक्षयाऽव्ययीभावसमासे मौलिकतां नावीन्यञ्च प्रदर्शयति। हेम यथा शब्दं व्याख्याय शब्दानुशासनकदृष्ट्या स्वकौशलं दर्शयाञ्चक्रे। समासप्रकरणे हेम्नः गौरवलाघवं गुणद्वयमास्ते।

हेम्नः तत्पुरुषप्रकरणम् 'गतिक्वन्यस्तत्पुरुषः' (३/१/४२) आरभते। अस्य सूत्रस्य स्थाने पाणिनिः 'कुगतिप्रादयः' (२/२/१८) प्रणिनिन्ये। तत्र गती तथा प्रादि संज्ञक-शब्दौ भेदवन्तौ, हेमचन्द्रेण द्वयोः समावेशः गतिसंज्ञायां कृतः।

हेमचन्द्रः 'कुत्सितः पुरुषो यस्य सः कुपुरुषः' अस्मिन् स्थले बहुव्रीहिसमासो न भवेत् एतदर्थं सूत्रे अन्यपदं प्रदत्तम्, यस्य व्याख्या स्वयं प्रकाशते, 'गतिक्वन्यस्त-त्पुरुषः' (३/१/४२) सूत्रस्य लघुवृत्तौ हेम लिखति –'अन्यो बहुव्रीह्वादिलक्षणहीनः' पाणिनिरपि अत्र अन्यपदार्थप्राधान्यमेव स्वीकरोति।

पाणिनिः द्विगुसमासार्थं 'संख्यापूर्वो द्विगुः' (........) सूत्रमलिखत्, अत्र अवशिष्टकार्यं कात्यायनः 'समाहारे चायमिष्यते' इति वार्तिकद्वारा कुरुते। प्रकरणेऽ-स्मिन् पाणिनिः तद्धितार्थे उत्तरपदे तथा समाहारे तत्पुरुषसमासार्थं 'तद्धितार्थोत्तरपद-समाहारे च' (२/१/५१) सूत्रं प्रणिन्ये। हेमचन्द्रः एतद्बृहत्प्रक्रियार्थं एकमेव 'संख्या समाहारे च द्विगुश्चानाम्न्ययम्' (३/१/९९) सूत्रमरचयत्। प्रायः एतद् दृश्यते यत् यत्र पाणिनेः लाघवं भवति तत्र हेम्नः विस्तारो विद्यते, तथा यत्र पाणिनेः विस्तारो भवति तत्र हेमचन्द्रस्य संक्षेपो वर्तते, किन्तु अत्र हेम्नः संक्षिप्तीकरणं श्लाघ्यं विद्यते।

संस्कृते साधारणनियमोऽस्ति यत् नञ्समासे यत्रोत्तरपरं भवति तत्र यदि व्यञ्जनायुत्तरपदश्चेत् 'न' इत्यस्य स्थाने अकारः। यथा न धर्मः = अधर्मः। यदि स्वाद्युतरपदञ्चेत् न आचारः = अनाचारः। तदेव पाणिनिना नेलोपं विधाय

अकारात् 'नु' इति आगमस्य विश्वानङ्कृत्वा क्लिष्ट कल्पना कृताऽस्ति। हेमचन्द्रेण न कारस्य स्थाने 'अने स्वरे' (३/२/१२९) सूत्रद्वारा अन्विहितः।

तिङन्तप्रकरणविचारावसरे हेमचन्द्रेण पूर्वकालसम्बन्धिनी प्रक्रिया दर्शिता तत्र विधद्वयम् — प्रथमा कातन्त्रप्रक्रिया विहिता यस्यां वर्तमानासप्तमीपञ्चमीहयस्तनी -अद्यतनी परोक्षा आशीश्श्वस्तनी भविष्यन्ती क्रियातिपत्ति सदृशाः दशविभक्तयः। द्वितीया पाणिनिप्रोक्ता प्रक्रिया लट्लिटादीनाम्। एतयो र्द्वयो प्रक्रिययो र्मध्ये हेमचन्द्रेण कातन्त्रप्रक्रिया स्वीकृता।

तत्र कारणं लट्लिटादीनां स्थाने प्रत्ययविधानं पश्चादर्थावबोधः इति दृष्ट्यो गौरवमाद्येत तस्मात् सरला कातन्त्रप्रक्रिया स्वीकृता।

हेमचन्द्रस्य तिङन्तप्रकरणे पाणिन्यपेक्षया निम्नाङ्किताः नवीनाः धातवः समुपलभ्यन्ते। धातुप्रक्रियास्तु पध्धतौ च समानमेवाऽनुशासनमुपलब्धम्।

| धातु | अर्थ | रुप |
|---|---|---|
| अघुङ् | गत्याक्षेप | अङ्घते, अङ्घिष्ट, आनङ्घे। |
| अर्जण | प्रतियत्न | अर्जयति, आर्जिजत्, अर्जयाञ्चकार। |
| अठुङ् | गति | अण्ठते, आण्ठिष्ट, आनण्ठे। |
| आङ्शासूकि, | इच्छा | आशास्ते, आशासिष्ट, आशशासे। |
| इं | गति | अयति, अयेत्, अयतु, आयत, ऐषीत्, इयाय, ईयात्, एता, एष्यति, ऐष्यत्। |
| इजुङ् | गति | ऐञ्जिष्ट, इञ्जाञ्चक्रे, इञ्जामास, इञ्जाम्बभूव। |
| उगु | गति | उङ्गाञ्चकार, उङ्गामास, उङ्गाम्बभूव। |
| उष | दाह | ओषति, ओषेत्, ओषतु, औषत्। |
| उर्दि | मान एवम् क्रीडा | ऊर्दते, और्दिष्ट, ऊर्दाञ्चक्रे। |
| ओवै | शोषण | ओवयात्, ओवयास्ताम्, ओवयासुः। |
| कर्ज | व्यथन | कर्जति, ककर्ज, कर्ज्यात्, कर्जिता, कर्जिष्यति, अकर्जिष्यत् |

| धातु | अर्थ | रुप |
|---|---|---|
| किष्किण् | हिंसा | किष्कयते, अचिकिष्कत, किष्कयाञ्चक्रे। |
| कुत्सिण् | अवक्षेप | कुत्सयते, अचुकुत्सत, कुत्सयाञ्चक्रे। |
| कूणिण | संकोचन | कूणयते, अचूकुणत, कूणयाञ्चक्रे। |
| कुख्, खुज् | स्तेय | खोजति, कोजति, खोजेत्, कोजेत्, खोजतु, कोजतु, अखोजत्, अकोजत्, अखोजीत्, अकोजीत्, खुखोज, कुकोज, खुज्यात्। |
| कॄ | हिंसा | कृणाति, कृणीयात्, कृणातु, अकृणात्, अकारीत्, अकेविष्ट, चिकेवे। |
| केवङ् | सेवन | केवते, अकेविष्ट, चिकेवे। |
| क्नथ | हिंसा | क्नथति, अक्नाथीत्, अक्नथीत्,चक्नाथ। |
| गड | सेचन | गडति, अगाडीत्, अगडीत्। |
| गग्घ | हसन | गग्घति, गग्घेत्, गग्घतु, अगग्घत्, अगग्घीत्, गगग्घ। |
| गुंत् | पुरीषोत्सर्ग | गुवति, गुबेत्, गुवतु, अगुवत्, अगुषीत्, जुगाव, गूयात्। |
| जेषङ् | गति | जेषते, अजेषिष्ट, जिजिषे। |
| टुड | निमज्जन | टुडति, अटुडीत्, टुटोड। |
| डंपि, डिंपि | संघात | डम्पयते, डिम्पयते, अडडम्पत, अडीडिम्पत, डम्पयाञ्चक्रे, डिम्पयाञ्चक्रे। |
| डवु, डिवुण | क्षेप | डम्बयति, डिम्बयति, अडडम्बत्, अडिडिम्बत्, डम्बयाञ्चकार। |
| तुवुण् | मर्दन | तुम्बयति, अतुतुम्बत्, तुम्बयाञ्चकार। |
| त्सर | छद्मगति | त्सरति, अत्सारीत्, तत्सार। |
| नख | गति | नखति, नखेत्, नखतु, अनखत्, अनखीत्, ननाख, नख्यात्। |

| धातु | अर्थ | रुप |
|---|---|---|
| नर्व | गति | नर्वति, अनर्वीत्, ननर्व। |
| निवु | सोचन | निन्वति, अनिन्वीत्, निनिन्व। |
| निषू | सेचन | नेषति, अनेषीत्, निनेष। |
| पिञ्चण | कुट्टन | पिञ्चयति, अपिपिञ्चत्, पिञ्चयाञ्चकार। |
| ब्लीश | वरण | ब्लिनाति, अब्लैषीत्, बिब्लाय। |
| ब्लेष्कण् | दर्शन | ब्लेष्कयति, अविष्लेष्कण्, ब्लेष्कयामास। |
| भ्रुडत् | संघात | भ्रुडति, अभ्रुडीत्, बुभ्रुडिम। |
| मिथग् | मेघा एवं हिंसा | मेथति, अमेथीत्, मिमेथ, मेथते, अमेथिष्ट, मिमेथे। |
| मेथग | संगमे | मेथति, अमेथीत्, मिमेथ, मेथते, अमेथिष्ट, मिमेथे। |
| वर्फ | गति | वर्फति, अबर्फीत्, ववर्फ। |
| बाधङ | रोटन | बाधते, अबाधिष्ट, बबाधे। |
| हेड | वेष्टन | हेडति, अहेडीत्, जिहेड। |

पाणिनिना वास्तव्यप्रयोगसिद्धये न किमपि अनुशासनं व्यधायि। यद्यपि कात्यायनेन पूर्तिर्विहिता तथाऽपि तस्यानुशासनप्रकारः न पूर्णतया वैज्ञानिकः। प्रोक्तप्रयोगसिद्धये तैः 'वसेस्तव्यत् कर्तरिणिच्चे' ति वार्षिकं व्यरचि। तस्याशयो वस्धातोः कर्तरि तव्यत् प्रत्ययः स्वयं णिच्च, णिद्करणं वृद्धयर्थम्।

हेमचन्द्रेणोक्तप्रयोगसिद्धि र्नियातीता। यद्यपि निपातनविधिरगति कगतिकोऽस्ति, तथाऽपि हेमव्याकरणैषा स्थिति र्मौलिक्यभवत्। पाणिनिना रुच्याव्यथ्यौ निपातितौ हेमचन्द्रेण 'रुप्याव्यथ्यवास्तव्यम्' (५/१/६) सूत्रद्वारा नैपातनिकमनुशासनमकारि। अनेन करणेन लाभोऽस्ति यत् वास्तव्यप्रयोगसिद्धिद्वारा अष्टाध्याय्या अभावपूर्तिरायभवत् सहैव कात्यायनस्य गौरवग्रस्ता प्रक्रियाऽपि निरस्ता।

पाणिनिना तव्यतव्यतअनीयर्यत्क्यप्घञाम्प्रत्ययानां कृत्यसंज्ञाविधानायैक-मधिकारसूत्रं 'कृत्याः' (३/१/९५) विरचितम्। हेमचन्द्रेण सर्वप्रत्ययविध्यनन्तरं 'ते कृत्याः' (५/१/४७) सूत्रद्वारा ते प्रोक्ताः सर्वे प्रत्ययाः कृत्यसंज्ञकाः। 'नन्दिग्र-हिपचादिभ्यो ल्युणिन्यचः' (३/१/१३४) इति सूत्रेण पाणिनिना नन्द्यादिभ्योऽनः, ग्रहादिभ्यो णिन् पचादिभ्योऽच् एवम्प्रकारेण विधानङ्कृतमस्ति। किन्तु हेमचन्द्रेण प्रत्ययत्रय 'अच्' (५/१/४९)। अनविधायकं सूत्रं 'नन्द्यादिभ्योऽनः' (५/१/५२) णिन्-विधायकं 'ग्रहादिभ्यो णिन्' (५/१/५३) हेमचन्द्रेण सरलदृष्ट्या विभाजन-ङ्कृतम्, तेन सह शैल्याः मौलिकताऽपि स्थापिता।

पाणिनिना जॄधातोः अप्तन् प्रत्यये 'जरत्'शब्दस्य सिद्धिः कृता। स्त्रीलिङ्गे जरती। हेमचन्द्रेण जॄष्धातोरत्प्रत्यये कृते रुपसिद्धिः कृदन्तप्रकरणेहेमपाणिन्योः प्रत्यया-नुशासने समत्वं दृश्यते। कृदन्तानन्तरं हेमचन्द्रेण तद्धितप्रत्ययानामनुशासङ्कृतम्। पाणिनीयानुशासने तद्धितप्रकरणं कृदन्तात् प्राक् प्रोक्तम्। पाणिनिना ण्यप्रत्ययविधानेन दितिशब्दात् दैत्य शब्दः, अदितेः आदित्यः, पत्यन्तबृहस्पत्यादिशब्देभ्यो बार्हस्पत्यादयो व्युत्पादिताः हेमचन्द्रेण 'अनिदम्यणपवादे च दित्यदित्यादित्यपत्त्युत्तरयाभ्योऽपि' (६/१/१५) इतिसूत्रेण व्युत्पादिताः, अवशिष्टः याभ्योऽपि व्युत्पादितः। पाणिनिना गौधेरः, गौधारः, गौधरिः, गौधेयश्च व्युत्पादिताः, हेमचन्द्रेणाऽपि गोधाया दुष्टे णारश्चेति सूत्रद्वारा व्युत्पादिताः।

पाणिनीयव्याकरणानुसारेण मनोरपत्यम् इत्यस्मिन् अर्थे अणि कृते मानवशब्दव्युत्पादितः।

हेमचन्द्रेण मानवशब्दसिद्धयै प्रत्यनः कृतः किन्तु हेमचन्द्रेण प्रसङ्गेऽस्मिन् नवीनशब्दोद्भावना विहिता। 'माणवः कुत्सायाम्' (६/१/९५) इति सूत्रेण कुत्सितार्थे णत्वञ्चविधाय 'मनोरपत्यं मूढः माणवः' इति साधितम्। पाणिनीयतन्त्रे तद्धितान्तो भाववाचको साम्राज्यशब्दः 'सम्राज्' शब्दात् साधितः किन्तु हेमचन्द्रेण कर्तृवाचकोऽपि साम्राज्यशब्दः क्षत्रियार्थे साधितः। 'सम्राजः क्षत्रिये' (६/१/१०१) सूत्रे। अर्थात् पाणिनीयव्याकरणे सम्राजः भावः कर्मवाऽस्मिन् अर्थे साम्राज्यशब्दस्य साधुत्वम्

तस्य चार्थः सम्राजः स्वभाव तत्सम्बन्धि वाऽन्यत्। हेमचन्द्रेण सम्राजः अपत्यं पुमान् इत्यर्थेदर्शितम्।

पाणिनिना 'युवति र्जाया यस्य' इत्यस्मिन्नर्थे बहुव्रीहिसमास विधानम् पश्चात् आकारस्य निङ् आदेशः। यकाललोपे च युवजानिरिति। हेमचन्द्रेण सारल्यं कृतं 'जायाया जानिः' सूत्रद्वारा जायाशब्दस्य जान्यादेशो विहितः।

हेमपाणिनिद्वयमपि महत्। द्वाभ्यामपि संस्कृतभाषायाः व्याकरणं व्यरचि। हेमचन्द्रात् प्राग् पाणिनिरभवत् - तस्मात् तस्मिन् अनुकरणं दृश्यते मौलिकताऽपि।

हेमपाणिनितुलनात्मकाध्ययविवेचनेन निष्कर्षो यत् पाणिनिव्याकरणं हीनं हैमादिति भ्रमयुक्तं वचः। वस्तुतस्तु स्वसमये पाणिनिना शब्दानुशासनस्य महत्वपूर्णं कार्यं कृतम्। अनुपस्थितं यत् सर्वं तत् समुपस्थितं कृतम्, ग्रथितम्, मण्डितम्, संशोधितञ्च पश्चात् समाजे मुक्तम्। तत्र यदि गौरवं दृश्यते चेत् तत्र न दोषः शिष्य-बुद्धिवैशद्यार्थमपि गुरुणो विस्तारः क्रियते, तं विस्तारं दृष्ट्वा कोऽपि जनव लाघवं कर्तुं शक्नुयात् न तत्र वैशिष्ट्यम्। हेमचन्द्रेण यत्र कुत्राऽपि मौलिकता दर्शिता तत्र पाणिनितः बहु गृहीतम्। तस्मादेव 'लोकात्' = पाणिनीयवैयाकरणादेः प्रामाणिकैश्च ज्ञातव्यमिति स्पष्टीकृतम्।